श्रीः

तिङन्तप्रक्रिया

३३ – तुदादिगणः (१)

०५.०४.२०१५

vyoma-samskrta-pathashala
sowmya.krishnapur@gmail.com

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

पुनरावर्तनम् - चुरादिगणः

- णिच्-प्रत्ययः (सत्यापपाश...चुरादिभ्यो णिच्)
- णिज्-विकल्पः
  - आधृषीयगणः
  - आस्वदीयगणः
  - पत गतौ
  - इदित्, ईदित्, उदित्, ऊदित् धातवः (अपवादः - यत्रि मत्रि तत्रि कुद्रि)
  - अदन्तेषु संयोगोपधाः धातवः (सकारादीन् विहाय)
  - भू, कृप

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

पुनरावर्तनम् - चुरादिगणः

- पदव्यवस्था
  - प्रायेण उभयपदिनः (णिचश्च)
  - आकुस्मीयाः आगर्वीयाश्च आत्मनेपदिनः

- णिच् प्रत्ययः
  - सनादिषु अन्यतमः
  - आर्धधातुकः

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

पुनरावर्तनम् - चुरादिगणः

- णिचि परे कार्याणि
  - आकारान्ताः – पुगागमः (अर्ति...आतां पुग्णौ)
  - इगन्ताः - वृद्धिः (अचो ञ्णिति)
  - अदन्ताः – अल्लोपः (अतो लोपः), उपधाकार्यनिषेधः
  - अदुपधाः – उपधावृद्धिः (अत उपधायाः)
  - लघु-इगुपधाः – उपधागुणः (पुगन्तलघूपधस्य च)
  - मितः – उपधाह्रस्वः (मितां ह्रस्वः)
  - कृत संशब्दने – उपधायाश्च इति इर्, उपधायां च इति दीर्घः
  - कृप अवकल्कने – कृपो रो लः इति लत्वम्

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

पुनरावर्तनम् - चुरादिगणः

- णिजन्तानां 'सनाद्यन्ता धातवः' इति धातुसंज्ञा
- लकारः
- अडाटौ
- लस्य तिबादयः
- विकरणः – शप्
- शपि गुणः एकारः(सार्वधातुकार्धधातुकयोः)
- अयादेशः (एचोऽयवायावः)
- प्रत्ययनिर्माणं, प्रत्यये परे कार्याणि च भ्वादिवत्

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

तुदादिगणः

- षष्ठः गणः
- तुदँ व्यथने – पिशँ अवयवे
- सिद्धान्तकौमुद्याम् १५७ धातवः
- पाठान्तरैः सह १७८ धातवः

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

विकरणः

- तुदादिभ्यः शः (३.१.७७)
- तुदादिभ्यः ५.३, शः १.१
- अनुवृत्तिः – सार्वधातुके ७.१, कर्तरि ७.१
- अधिकारः – प्रत्ययः, परः, आद्युदात्तः, धातोः
- सूत्रार्थः – तुदादिभ्यः धातुभ्यः परः आद्युदात्तः श-प्रत्ययः स्यात् कर्त्रर्थे सार्वधातुके परे।
- उदाहरणम् – तुद् ति -> तुद् अ[श] ति, लिख् ति -> लिख् अ[श] ति

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

शप्रत्ययः

- 'लशक्वतद्धिते' (१.३.८) इति शकारस्य इत्संज्ञा। 'तस्य लोपः (१.३.९)। 'अ' इति शिष्यते।
- 'तिङ्शित् सार्वधातुकम्' (३.४.११३) इति सार्वधातुकसंज्ञा।
- 'सार्वधातुकमपित्' (१.२.४) इति ङिद्वद्भावः।
  - 'क्ङिति च' (१.१.५) इति गुण-वृद्धिनिषेधः।
  - सम्प्रसारणम्।
  - अन्यानि ङित्-निमित्तकानि कार्याणि।

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

१. शे अङ्गकार्यम् – इयङुवङौ

- अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.४.७७)
- अचि ७.१, श्नु-धातु-भ्रुवाम् ६.३, य्वोः ६.२, इयङ्-उवङौ १.२
- अधिकारः – अङ्गस्य ६.१, असिद्धवदत्राभात्
- सूत्रार्थः – श्नुप्रत्ययान्तस्य, इवर्णान्त-उवर्णान्तधातोः, भ्रू इत्यस्य च अङ्गस्य इयङ्-उवङौ स्तः अचि परतः।
- उदाहरणम् – शक्नु+अन्ति -> शक्नुवन्ति,
- रि+अन्ति -> रियन्ति, धु+अन्ति -> धुवन्ति
- भ्रू+अः -> भ्रुवः

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

इयङुवङौ

इकारान्ताः धातवः

रि+अ -> रिय् अ

पि+अ -> पिय् अ

धि+अ -> धिय् अ

क्षि+अ -> क्षिय् अ

उकारान्ताः धातवः

गु+अ -> गुव् अ

ध्रु+अ -> ध्रुव् अ

कु+अ -> कुव् अ

नू+अ -> नुव

सू+अ -> सुव

धू+अ -> धुव

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

२. शे अङ्गकार्यम् – रिङ्

- रिङ् शयग्लिङ्क्षु (७.४.२८)
- रिङ् १.१, श-यक्-लिङ्-षु ७.३
- अनुवृत्तिः – ऋतः ६.१, अकृत्सार्वधातुकयोः ७.२, यि ७.१
- अधिकारः – अङ्गस्य
- सूत्रार्थः – ऋदन्तस्य अङ्गस्य रिङ्-आदेशः स्यात् शे, यकि, यादावसार्वधातुके लिङि च।
- उदाहरणम् – मृ अ[श] -> म्रि अ
- मृ य[यक्] -> म्रि य
- मृ+यात् -> म्रि यात्

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

रिङ्

- पृ अ -> प्रि अ (रिङ्) -> प्रिय (इयङ्)
- मृ अ -> म्रि अ -> म्रिय
- द्द अ -> द्रि अ -> द्रिय
- धृ अ -> ध्रि अ -> ध्रिय

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014

३. शे अङ्गकार्यम् – इत्त्वम्

- ऋत इद्धातोः (७.१.१००)
- ऋतः ६.१, इत् १.१, धातोः ६.१
- अधिकारः – अङ्गस्य
- सूत्रार्थः – ऋकारान्तस्य धातोः अङ्गस्य इत्-आदेशः स्यात्।
- ऋकारस्य विधीयमानः अण्=इकारः 'उरण्प्रपरः' इत्यनेन रेफसहितः। 'इर्' इत्यादेशः फलति।
- उदाहरणम् – कॄ अ[श] -> किर् अ, गॄ अ -> गिर् अ

Sowmya Krishnapur for Vyoma-samskrta-pathashala, ©2014